## यमरमनमातां सक् च। (७३/२३७७)

यम रम नम इत्येषामङ्गानाम् आकारान्तानां च [1]सगागमो भवति [2]परस्मैपदे सिचि, [3]इडागमश्च। यम् अयंसीत्, अयंसिष्टाम्, अयंसिषुः। रम् – अरंसीत्, अरंसिष्टाम्, अरंसिषुः। नम् – अनंसीत्, अनंसिष्टाम् अनंसिषुः। आकारान्तानाम् – अयासीत्, अयासिष्टाम्, अयासिषुः। यमादीनां हलन्तलक्षणा वृद्धिः (७.२.३/२२६७)' प्राप्ता सा नेटि (७.२.४/२२६८) प्रतिषिध्यते। परस्मैपदेषु इत्येव, [4]अयंस्त। अरंस्त। अनंस्त॥

## स्मिपूङ्रञ्ज्वशां सनि। (७४/२६२६)

स्मिङ पूङ ऋ अञ्जू अशू इत्येतेषां धातूनां सनि इडागमो भवति। सिस्मयिषते। पिपविषते। अरिरिषति। अञ्जिजिषति। अशिशिषते। ङकारग्रहणं पूञो मा भूत्। पुपूषति इत्येव तस्य भवति। अशेः ऊदितो ग्रहणात् अश्नोतेर्नित्यमिडागमोऽस्त्येव[5]॥

## किरश्च पञ्चभ्यः। (७५/२६११)

[6]किरादिभ्यः पञ्चभ्यः [7]सनि इडागमो भवति। कॄ – चिकरिषति। गॄ – जिगरिषति। दृङ – दिदरिषते। धृङ – दिधरिषते। प्रच्छ् – पिप्रच्छिषति। पञ्चभ्यः इति किम्? सिसृक्षति। किरतिगिरत्योः– 'इट् सनि वा' (७.२.४१/२६२५) इति विकल्पः प्राप्तः, 'वृतो वा' (७.२.३८/२३९१) इति च। अस्येटो दीर्घत्वं [8]नेच्छन्ति॥

## रुदादिभ्यः सार्वधातुके। (७६/२४७४)

रुदादिभ्यः [9]उत्तरस्य वलादेः सार्वधातुकस्य इडागमो भवति। रुद् – रोदिति। स्वप् – स्वपिति। श्वस् – श्वसिति। अन् – प्राणिति। जक्ष् – जक्षिति। पञ्चभ्यः इत्येव, जागर्ति। सार्वधातुके इति किम्? स्वप्ता। वलादेः इत्येव, रुदन्ति॥

## ईशः से। (७७/२४३९)

ईश उत्तरस्य से इत्येतस्य सार्वधातुकस्य इडागमो भवति। ईशिषे। ईशिष्व[10]॥

---

1. अमागमः क. 2. परस्मैपदपरे इ. 3. इडागमोऽपि भवति ब. 4. आयंस्त ड. 5. अशिशिषति इत्यधिकम् ह. 6. सनि इति वर्तते इत्यधिकम् क, कॄ इत्येवमादिभ्यः क. 7. सनि परतः ब. इ, उत्तरस्य क. 8. नेष्यते ड. 9. पञ्चभ्यः इत्यधिकम् ब. क. इ. ई. ह. 10. एकदेशविकृतस्यानन्यत्वात् इत्यधिकम् ब.